# Narayanapurvatapiniya Upanishad

# નારાયણપૂર્વતાપિનીયોપનિષત્

## Document Information

Text title : nArAyaNapUrvatApinIyopaniShat

File name : nArAyaNapUrvatApinIyopaniShat.itx

Category : upanishhat, vishhnu, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# નારાયણપૂર્વતાપિનીયોપનિષત્

## પ્રથમઃ ખણ્ડઃ ।

અથ બ્રહ્માણં ભગવન્તં સનત્કુમારઃ પપ્રચ્છ । કીદૃશં
નારાયણાષ્ટાક્ષરં ભવતીતિ વ્યાચષ્ટે । અથ યો વૈ નારાયણઃ સ
ભગવાન્ પરબ્રહ્મણ આનન્દો ભવતિ । જ્ઞાત્વા જીવન્મુક્તો ભવતિ ।
સચ્ચિદાનન્દસ્વરૂપપરવસ્તુ ભવતિ । અષ્ટાક્ષરં અષ્ટમૂર્તિ
ભવતિ । પ્રથમરૂપઃ પૃથિવીરૂપો ભવતિ । દ્વિતીયમાપો ભવતિ ।
તતીયસ્તેજો ભવતિ । ચતુર્થો વાયુર્ભવતિ । પઞ્ચમ આકાશો ભવતિ ।
ષષ્ઠશ્ચન્દ્રમા ભવતિ । સપ્તમઃ સૂર્યો ભવતિ । અષ્ટમો યજમાનઃ ॥

ભૃમિરાપસ્તથા તેજો વાયુર્વ્યોમ ચ ચન્દ્રમાઃ ।
સૂર્યઃ પુમાંસ્તથાચેતિ મૂર્તયશ્ચાષ્ટ કીર્તિતાઃ ॥

અકારોકારમકારનાદબિન્દુકલાનુસન્ધાનધ્યાનાષ્ટવિધા અષ્ટાક્ષરં ભવતિ ।
અકારઃ સદ્યોજાતો ભવતિ । ઉકારો વામદેવઃ । અઘોરો મકારો ભવતિ ।
તત્પુરુષો નાદઃ । બિન્દુરીશાનઃ । કલા વ્યાપકો ભવતિ । અનુસન્ધાનો
નિત્યઃ । ધ્યાનસ્વરૂપં બ્રહ્મ । સર્વવ્યાપકોઽષ્ટાક્ષરઃ ॥

નારાયણઃ પરં બ્રહ્મ જ્ઞાનં નારાયણઃ પરઃ ।
નારાયણં મહાપુરુષં વિશ્વમાત્માનમવ્યયમ્ ॥

અન્તર્બહિશ્ચ તત્સર્વં સ્થિતો નારાયણઃ પરઃ ।
સહસ્રશીર્ષં દેવમક્ષરં પરમં પદમ્ ॥

નારાયણં શિવં શાન્તં સર્વવેદાન્તગોચરમ્ ।
સૃષ્ટિઃ સ્થિતિશ્ચ સંહારતિરોધાનાનુસમ્મતમ્ ।
પઞ્ચકૃત્યસ્ય કર્તારં નારાયણમનામયમ્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપૂર્વતાપિનીયે પ્રથમઃ ખણ્ડ ।

## દ્વિતીયઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા નારાયણાષ્ટાક્ષરમન્ત્રં વ્યાચષ્ટે ।
શ્રીમન્નારાયણસ્ય દશમન્ત્રાઃ કથ્યન્તે ।
ૐ નમો નારાયણાય ઇત્યષ્ટાક્ષરો મન્ત્રઃ । સ એવ મન્ત્રરાજો ભવતિ ।
એતન્નારાયણસ્ય તારકં ભવતિ । તદેવોપાસિતવ્યં ભવતિ ।
ઇત્યુવાચ ભગવાન્નારાયણશબ્દપરબ્રહ્મશ્રીમહામાયાપ્રકૃતિ-
સર્વમેકજનનીલક્ષ્મીર્ભવતિ ।
દેવાનાં દેવલક્ષ્મીર્ભવતિ । સિદ્ધાનાં સિદ્ધલક્ષ્મીર્ભવતિ ।
મુમુક્ષણાં મોક્ષલક્ષ્મીર્ભવતિ । યોગિનાં યોગલક્ષ્મીર્ભવતિ ।
મુનીનાં વિવેકબુદ્ધિર્ભવતિ । રાજ્ઞાં રાજ્યલક્ષ્મીર્ભવતિ । સૃષ્ટિરૂપા
સરસ્વતી ભવતિ । સ્થિતિરૂપા મહાલક્ષ્મીર્ભવતિ । સંહારરૂપા રુદ્રાણી
ભવતિ । તિરોધાનકરી પાર્વતી ભવતિ । અનુગ્રહરૂપા ઉમા ભવતિ ।
પઞ્ચકૃત્યરૂપા પરમેશ્વરી ભવતિ । શ્રીમહાલક્ષ્મ્યૈ નમ ઇતિ
સપ્તાક્ષરો મન્ત્રઃ ॥

સર્વેષામેવ ભૂતાનાં મહાસૌભાગ્યદાયિની ।
મહાલક્ષ્મીર્મહાદેવી સર્વલોકૈકમોહિની ॥

સામ્રાજ્યદાયિની નિત્યં સર્વવેદસ્વરૂપિણી ।
મહાવિદ્યા જગન્માતા મુનીનાં મોક્ષદાયિની ।
જ્ઞાનિનાં જ્ઞાનદા સત્યં દાનવાનાં વિનાશિની ॥

ઇતિ મહાલક્ષ્મીર્મૂલપ્રકૃતિર્ભવતિ । નારાયણઃ
સ ભગવાન્ પરબ્રહ્મસ્વરૂપી સર્વવેદાન્તગોચરઃ
નિત્યશુદ્ધબુદ્ધપરબ્રહ્માનન્દમયો ભવતિ । તસ્માલ્લક્ષ્મીનારાયણ
ઇતિ સ હોવાચ ભગવાન્ ય એવં વેદ । ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપૂર્વતાપિનીયે દ્વિતીયઃ ખણ્ડ ।

## તૃતીયઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા નારાયણમન્ત્રઃ કીદૃશો ભવતિ । "ૐ
નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ । તન્નો વિષ્ણુઃ પ્રચોદયાત્"
ઇતિ ગાયત્રી ભવતિ । "ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે

પદમ્ । સમૂઢમસ્ય પાઁસુરે ।” “અતો દેવા ભવન્તુ નો યતો
વિષ્ણુર્વિચક્રમે । પૃથિવ્યાઃ સપ્તધામભિઃ” ઇતિ મન્ત્રદ્વયેન
નારાયણપ્રતિપાદિતં ભવતિ ।” સ બ્રહ્મા સ શિવઃ સ હરિઃ સેન્દ્રઃ
સોઽક્ષરઃ પરમઃ સ્વરાટ્”। નારાયણાયેતિ પઞ્ચાક્ષરં ભવતિ ।
ૐ નમો વિષ્ણવ ઇતિ ષડક્ષરં વિજ્ઞાતમ્ । નમો નારાયણાયેતિ સપ્તાક્ષરં
ભવતિ । ૐ નમો ભગવતે વાસુદેવાયેતિ દ્વાદશં પરિકીર્તિતમ્ ।
ૐ શ્રીં હ્રીં ક્લીં નમો નારાયણાય સ્વાહા । યસ્ય કસ્યાપિ ન દેયમ્ ॥

પુત્રો દેયઃ શિરો દેયં ન દેયા ષોડશાક્ષરી ।
ન વદેદ્યસ્ય કસ્યાપિ કિં તુ શિષ્યાય તાં વદેત્ ॥

ૐ શ્રીં હ્રીં નમો ભગવતે લક્ષ્મીનારાયણાય વિષ્ણવે વાસુદેવાય સ્વાહા ॥

શ્રીમહાવિષ્ણવે તુભ્યં નમો નારાયણાય ચ ।
ગોવિન્દાય ચ રુદ્રાય હરયે બ્રહ્મરૂપિણે ॥

નારાયણ મહાવિષ્ણો શ્રીધરાનન્ત કશવ ।
વાસુદેવ જગન્નાથ હૃષીકેશ નમો નમઃ ॥

ઇત્યનુષ્ટુબ્દ્વયં મન્ત્રં વ્યાખ્યાતમ્ । અથ માલામન્ત્રં વ્યાખ્યાસ્યામઃ ।
સ હોવાચ ભગવાન્ બ્રહ્મા ય એવં વેદ । ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપૂર્વતાપિનીયે તૃતીયઃ ખણ્ડ ।

## ચતુર્થઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ પિતામહઃ ગાયત્રીં વ્યાચષ્ટે । ગોવિન્દાય
વિદ્મહે વાસુદેવાય ધીમહિ । તન્નો નારાયણઃ પ્રચોદયાત્ ।
કામદેવાય વિદ્મહે પુષ્પબાણાય ધીમહિ । તન્નોઽનઙ્ગઃ
પ્રચોદયાત્ । મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ની ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ । “વિષ્ણોર્નુકં વીર્યાણિ પ્રવોચં
યઃ પાર્થિવાનિ વિમરે રજા,ઁસિ યો અસ્કભાયદુત્તર,ઁસધસ્થં
વિચક્રમાણસ્ત્રેધોરુગાયઃ” “ત્રિર્દેવઃ પૃથિવીમેષ એતામ્ ।
વિચક્રમે શતર્ચસં મહિત્વા । પ્રવિષ્ણુરસ્તુ તવસસ્તવીયાન્ ।
ત્વેષ,ઁહ્યસ્ય સ્થવિરસ્ય નામ ।”

સત્કુમિવ તિતૌના પુનન્તો યત્ર ધીરા મનસા વાચમકૃત ।

અત્રા સખાયઃ સખ્યાનિ જાનતે ભદ્રૈષાં લક્ષ્મીર્નિહિતાધિવાચિ ॥

“પ્રતદ્વિષ્ણુસ્તવતે વીર્યાય । મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષુ । અધિક્ષિયન્તિ ભુવનાનિ વિશ્વા । ”,
“ય ઈ,ઁશૃણોત્યલક,ઁ શૃણોતિ । ન હિ પ્રવેદ
સુકૃતસ્ય પન્થામ્ ।” અક્ષન્વન્તઃ કર્ણવન્તઃ સખાયો
મનો જીવેષ્વસમા બભૂવુઃ । તસ્માલ્લક્ષ્મીનારાયણં સર્વબીજં
સર્વભૂતાધિવાસં યો વેત્તિ સ વિદ્વાન્ ભવતિ । ઉપાસકાનાં
મોક્ષપ્રાપ્તિર્ભવતિ । સ જીવન્મુક્તો ભવતિ । સ હોવાચ ભગવાન્
ઉપાસનવિધિં વ્યાચષ્ટે । બ્રહ્મા ઋષિર્ભવતિ । ગાયત્રી છન્દ ઉચ્યતે ।
શ્રીમન્નારાયણપરમાત્મા દેવતા । પ્રણવં બીજમ્ । નમઃ શક્તિરુચ્યતે ।
કીલકં નારાયણેતિ ॥

ધર્માર્થકામમોક્ષેષુ વિનિયોગોઽથ ભાવના ।
મહોલ્કાય વીરોલ્કાય વૃદ્ધોલ્કાય પૃથૂલ્કાય વિદ્યુલ્કાય જ્વલદુલ્કાય
ચ ષડઙ્ગકલ્પિતાઃ નમઃસ્વાહાવષડ્વૌષટ્પદાન્તા અઙ્ગન્યાસા ભવન્તિ ।
નીલજીમૂતસઙ્કાશં પીતકૌશેયવાસસમ્ ।
કિરીટકુણ્ડલધરં કૌસ્તુભોદ્ભાસિતોરસમ્ ॥

શઙ્ખચક્રગદાખડ્ગધારિણં વનમાલિનમ્ ।
વામભાગે મહાલક્ષ્મ્યાલિઙ્ગિતાર્ધશરીરિણમ્ ॥

સનકાદિભિઃ સંસેવ્યં સ્તૂયમાનં મહર્ષિભિઃ ।
બ્રહ્માદિભિઃ સદા ધ્યેયં ધ્યાત્વા નારાયણં વિભુમ્ ॥

કર્મણા મનસા વાચા સંસ્મરેત્ પ્રજપેત્ સુધીઃ ।
અયુતં જપમાત્રેણ સર્વજ્ઞાનપ્રદો ભવેત્ ॥

લક્ષમાત્રં તુ પ્રજપેત્ સ્વસ્વરૂપં ભવેન્મનુઃ ।
અત ઊર્ધ્વં સદા ધ્યાયેત્ સાક્ષાન્નારાયણો હરિઃ ॥

સ હોવાચ ભગવાન્ ય એવં વેદ । ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપૂર્વતાપિનીયે ચતુર્થઃ ખણ્ડ ।

## પઞ્ચમઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા દશકળાત્મકોઽવતારઃ કથ્યતે ॥

જરા પાલિનિકા શાન્તિરીશ્વરી રતિકામિકા ।
વરદા હ્લાદિની પ્રીતિર્દીર્ઘા દશકલા હરેઃ ॥

નારાયણાદવતારા મન્ત્રરૂપા જાયન્તે । ॐ નમો નારાયણાય સ્વાહા । ત્વં દશાક્ષરો મહામન્ત્રો ભવતિ । તત્ર પ્રથમો મત્સ્યાવતારઃ । દ્વિતીયઃ કૂર્મઃ । તૃતીયો વરાહઃ । ચતુર્થો નરસિંહઃ । પઞ્ચમો વામનઃ । ષષ્ઠો જમદગ્નિઃ । સપ્તમો રામચન્દ્રઃ । અષ્ટમઃ કૃષ્ણઃ પરમાત્મા । નવમો બુદ્ધાવતારઃ । દશમઃ કલ્કિર્જનાર્દનઃ । ॐ મત્સ્યાવતારાય નમઃ । શ્રીં કૂર્માવતારાય નમઃ । હ્રીં વરાહાવતારાય નમઃ । હ્રૂં નૃસિંહાવતારાય નમઃ । સૌઃ વામનાવતારાય નમઃ । ઐં પરશુરામાવતારાય નમઃ । ગ્લૌં રામચન્દ્રાય નમઃ । ક્લીં કૃષ્ણાય નમઃ । બ્લૂં બુદ્ધાવતારાય નમઃ । સઃ કલ્ક્યવતારાય નમઃ ઇતિ । પ્રજાપતિઃ પ્રજાયતે । તસ્માન્નારાયણઃ પ્રજાયતે । બ્રહ્મા જાયતે । બ્રહ્મણઃસકાશાત્ પઞ્ચમહાભૂતાનિ તન્માત્રાણિ જાયન્તે । જ્ઞાનેન્દ્રિયકર્મેન્દ્રિયાણિ મનોબુદ્ધિચિત્તાહઙ્કારા જાયન્તે । પ્રકૃતિર્જાયતે । ચતુર્વિંશતિતત્ત્વાત્મકો નારાયણઃ । પઞ્ચવિંશતિતત્ત્વાત્મકઃ પુરુષત્વં પરબ્રહ્મ ભવેત્ । શિવશ્ચ નારાયણઃ । શક્રશ્ચ નારાયણઃ । દિશશ્ચ નારાયણઃ । ઊર્ધ્વઞ્જ નારાયણઃ । અન્તશ્ચ નારાયણઃ । નારાયણઃ સર્વં ખલ્વિદં બ્રહ્મ । તસ્માન્નારાયણાદણ્ડજસ્વેદજોદ્ભિજ્જજરાયુજમનસિજાદયઃ સર્વે મહાભૂતાઃ પ્રજાયન્તે ॥

અજામેકાં લોહિતશુક્લકૃષ્ણાં બરહ્વીં પ્રજાં જનયન્તીꣳ સરૂપામ્ ।
અજો હ્યેકો જુષમાણોઽનુશેતે જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ ॥

અણ્ડજાઃ સર્વખગરૂપા જાયન્તે । સ્વેદજાઃ ક્રિમિકીટાદયઃ । ઉદ્ભિજ્જાસ્તરુગુલ્મલતાદયઃ । જરાયુજા નરપશુમૃગાદયો જાયન્તે । મનસિજા નારદાદયઃ સર્વે ઋષયઃ । નારાયણઃ સ્થાવરજઙ્ગમાત્મકો ભવતિ । અષ્ટવસવો નારાયણઃ । એકાદશરુદ્રા નારાયણઃ । નારાયણાત્ દ્વાદશાદિત્યાઃ । સર્વે દેવા ઋષયો મુનયઃ સિદ્ધગન્ધર્વયક્ષરક્ષઃપિશાચાઃ સર્વે નારાયણઃ । નારાયણ એવેદં

સર્વમ્ । લક્ષ્મીર્મૂલપ્રકૃતિરિતિ વિજ્ઞાયતે । વસ્ત્વેકં પરબ્રહ્મ
નારાયણઃ સનાતનઃ ॥

સાક્ષાન્નારાયણો દેવઃ પરબ્રહ્માભિધીયતે ।
સચ્ચિદાનન્દાત્મકાઃ સ્યુર્વિષ્ણૌ નિત્યે પ્રકલ્પિતાઃ ।
નાનાવિધાનિ રૂપાણિ હાટકે કણ્ટકાદિવત્ ॥

“ચત્વારિ વાક્પરિમિતા પદાનિ । તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ ।
ગુહા ત્રીણિ નિહિતા નેઙ્ગયન્તિ । તુરીયં વાચો મનુષ્યા વદન્તિ ।”
પરાપશ્યન્તીમધ્યમાવૈખરીરૂપા સરસ્વતીતિ ચતુર્વિધા વાચો વદન્તિ ।
વૈખરી સર્વવિદ્યાસુ પ્રશસ્તા ॥

અઙ્ગાનિ વેદાશ્ચત્વારો મીમાંસા ન્યાયવિસ્તરઃ ।
પુરાણં ધર્મશાસ્ત્રં ચ વિદ્યા હ્યેતાશ્ચતુર્દશ ॥

આયુર્વેદો ધનુર્વેદો ગાન્ધર્વં મન્ત્રશાસ્ત્રકમ્ ।
વિદ્યાશ્ચાષ્ટાદશ પ્રોક્તા નારાયણનિવેશિતાઃ ॥

તસ્ય નિશ્વસિતમેવ ઋગ્વેદો યજુર્વેદઃ સામવેદો હ્યથર્વાઙ્ગિરશ્ચેતિ ।
સર્વવેદવેદાન્તાનાં નારાયણપરબ્રહ્મણ્યેવ તાત્પર્યમ્ । સ હોવાચ ભગવાન્
ય એવં વેદ । ઇત્યુપનિપત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપૂર્વતાપિનીયે પઞ્ચમઃ ખણ્ડ ।

## ષષ્ઠઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા નારાયણયન્ત્રમન્ત્રાવરણપૂજામાચચક્ષે ।
ત્રિકોણં પ્રથમં ભવતિ । દ્વિતીયં ષટ્કોણં ભવતિ ।
વૃત્તમષ્ટદલં તૃતીયમ્ । ચતુર્થં દ્વાદશદલમ્ ।
પઞ્ચમં ષોડશદલમ્ । ચતુર્વિંશતિ (ઃ) ષષ્ઠમ્ ।
દ્વાત્રિંશતિ(ઃ) સપ્તમમ્ । અષ્ટમં ભૂપુરમ્ । એવં યન્ત્રં
સમાલિખેત્ । મધ્યે લક્ષ્મીનારાયણં વિક્ષેપશક્ત્યાવરણં
શક્તિપ્રભાશક્તિત્રિકોણદેવતાઃ ષટ્કોણં વૃદ્ધોલ્કાદયઃ પૂજ્યાઃ ।
સર્વજ્ઞાનિત્વતૃત્પ્યનાદિબોધસ્વતન્ત્રનિત્યમલુપ્તાનન્તં ષટ્કોણશક્તયઃ ।
સનકસનન્દનસનત્સુજાતસનત્કુમાંરસનાતનનારદતુમ્બુરુ-
સમન્તાદયોઽષ્ટદલાઃ ।

વસિષ્ઠવાલખિલ્યવિશ્વામિત્રકશ્યપાત્રિભરદ્વાજાઙ્ગીરસ-
જામદગ્નિગૌતમાગસ્ત્યજાબાલિકપિલા દ્વાદશદલાઃ ।
મત્સ્યકૂર્મવરાહનારસિંહવામનરામરામકૃષ્ણબુદ્ધકલ્કિસદ્યોજાતવામદેવા
અઘોરતત્પુરુષેશાનપરમેશ્વરાઃ ષોડશદલાઃ ॥

શઙ્ખચક્રગદાપદ્મખડ્ગશ્રીવત્સકૌસ્તુભવનમાલાદિકિરીટ-
કુણ્ડલકેયૂરહારાઙ્ગદશાર્ઙ્ગિશરનન્દકપદ્મવેણુ-
બર્હિપિઞ્છશેષાનન્તગરુડવિષ્વક્સેનબ્રહ્માણશ્ચતુર્વિંશતિદલાઃ
કેશવાદિચતુર્વિંશત્યનુક્રમમ્ ।
હરિશ્રીકૃષ્ણમુકુન્દકુમુદાક્ષપુણ્ડરીકાક્ષધામકશઙ્ખવર્ણ-
સર્વનેત્રસુમુખસુપ્રતીકા દ્વાત્રિંશદ્દલાઃ ।
ઐરાવતપુણ્ડરીકવામનકુમુદાઞ્જનપુણ્યદન્તસાર્વભૌમ-
સુપ્રતીકાક્ષાશ્ચતુરશ્રદેવતાઃ ।
ૐ નમો નારાયણાયાષ્ટાક્ષરસંજ્ઞાવરણદેવતાપૂજા કર્તવ્યા ।
સ હોવાચ ભગવાન્ ય એવં વેદ । ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણપર્વતાપિનીયે ષષ્ઠઃ ખણ્ડઃ
(વૈષ્ણવ-ઉપનિષદઃ)

ઇતિ નારાયણપૂર્વતાપિનીયોપનિષત્ સમાપ્ત ।

Proofread by Kasturi navya sahiti

---

*Narayanapurvatapiniya Upanishad*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*